# ॥ શ્રીકાર્તિકેયસ્તોત્રમ્ ૨ ॥

.. shrIkArtikeyastotram 2 ..

sanskritdocuments.org

August 20, 2017

# .. shrIkArtikeyastotram 2 ..

# ॥ શ્રીકાર્તિકેયસ્તોત્રમ્ ૨ ॥

## Sanskrit Document Information

Text title : kArtikeyastotram 2

File name : kArtikeyastotram2.itx

Category : subrahmanya

Location : doc_subrahmanya

Language : Sanskrit

Subject : philosophy/hinduism/religion

Proofread by : Sivakumar Thyagarajan shivakumar24 at gmail, PSA Easwaran

Description-comments : Subrahmanya Stuti Manjari, Mahaperiaval Trust

Acknowledge-Permission: Mahaperiaval Trust

Latest update : December 22, 2016

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 20, 2017

*sanskritdocuments.org*

# ॥ શ્રીકાર્તિકેયસ્તોત્રમ્ ૨ ॥

ॐ શ્રીગણેશાય નમઃ ।

ભાસ્વદ્વજ્રપ્રકાશો દશશતનયનેનાર્ચિતો વજ્રપાણિઃ
ભાસ્વન્મુક્તાસુવર્ણાઙ્ગદમુકુટધરો દિવ્યગન્ધોજ્જ્વલાઙ્ગઃ ।
પાવઞ્જેશો ગુણાઢ્યો હિમગિરિતનયાનન્દનો વહ્નિજાતઃ
પાતુ શ્રીકાર્તિકેયો નતજનવરદો ભક્તિગમ્યો દયાલુઃ ॥ ૧॥

સેનાનીર્દેવસેનાપતિરમરવરૈઃ સન્તતં પૂજિતાઙ્ઘ્રિઃ
સેવ્યો બ્રહ્મર્ષિમુખ્યૈર્વિગતકલિમલૈર્જ્ઞાનિભિર્મોક્ષકામૈઃ ।
સંસારાબ્ધૌ નિમગ્નૈર્ગૃહસુખરતિભિઃ પૂજિતો ભક્તવૃન્દૈઃ
સમ્યક્ શ્રીશમ્ભુસૂનુઃ કલયતુ કુશલં શ્રીમયૂરાધિરૂઢઃ ॥ ૨॥

લોકાંસ્ત્રીન્ પીડયન્તં દિતિદનુજપતિં તારકં દેવશત્રું
લોકેશાત્પ્રાપ્તસિદ્ધિં શિતકનકશરૈર્લીલયા નાશયિત્વા ।
બ્રહ્મેન્દ્રાદ્યાદિતેયૈર્મણિગણખચિતે હેમસિંહાસને યો
બ્રહ્મણ્યઃ પાતુ નિત્યં પરિમલવિલસત્પુષ્પવૃષ્ટ્યાઽભિષિક્તઃ ॥ ૩॥

યુદ્ધે દેવાસુરાણામનિમિષપતિના સ્થાપિતો યૂથપત્વે
યુક્તઃ કોદણ્ડબાણાસિકુલિશપરિઘૈઃ સેનયા દેવતાનામ્ ।
હત્વા દૈત્યાન્પ્રમત્તાન્ જયનિનદયુતૈર્મઙ્ગલૈર્વાદ્યઘોષૈઃ
હસ્તિશ્રેષ્ઠાધિરૂઢો વિબુધયુવતિભિર્વીજિતઃ પાતુ યુક્તઃ ॥ ૪॥

શ્રીગૌરીકાન્તપુત્રં સુરપતનયયા વિષ્ણુપુત્ર્યા ચ યુક્તં
શ્રીસ્કન્દં તામ્રચૂડાભયકુલિશધરં શક્તિહસ્તં કુમારમ્ ।
ષડ્ગ્રીવં મઞ્જુવેષં ત્રિદિવવરસુમસ્રગ્ધરં દેવદેવં
ષડ્વક્ત્રં દ્વાદશાક્ષં ગણપતિસહજં તારકારિં નમામિ ॥ ૫॥

કૈલાસોત્તુઙ્ગશૃઙ્ગે પ્રમથસુરગણૈઃ પૂજિતં વારિવાહં
કૈલાસાદ્રીશપુત્રં મુનિજનહૃદયાનન્દનં વારિજાક્ષમ્ ।
ગન્ધાઢ્યાં પારિજાતપ્રભૃતિસુમકૃતાં માલિકાં ધારયન્તં
ગઙ્ગાપત્યં ભજેઽહં ગુહમમરનુતં તપ્તજામ્બૂનદાભમ્ ॥ ૬॥

ભક્તેષ્ટાર્થપ્રદાને નિરતમભયદં જ્ઞાનશક્તિં સુરેશં
ભક્ત્યા નિત્યં સુરર્ષિપ્રમુખમુનિગણૈરર્ચિતં રક્તવર્ણમ્ ।

વન્દ્યં ગન્ધર્વમુખ્યૈર્ભવજલધિતરિં પીતકૌશેયવસ્ત્રં
વન્દે શ્રીબાહુલેયં મદનરિપુસુતં કોટિચન્દ્રપ્રકાશમ્ ॥ ૭॥

તપ્તસ્વર્ણાભકાયં મધુરિપુતનયાકાન્તમમ્ભોજનેત્રં
તત્ત્વજ્ઞં ચન્દ્રમૌલિપ્રિયસુતમિભવક્ત્રાનુજં શક્તિપાણિમ્ ।
ગાઙ્ગેયં કાર્તિકેયં સ્મરસદૃશવપું રત્નહારોજ્જ્વલાઙ્ગં
ગાનપ્રેમં શુભાઙ્ગં સ્મિતરુચિરમુખં ચારુભૂષં નમામિ ॥ ૮॥

ધ્યાયેદ્બાલાર્કકાન્તિં શરવણજનિતં પાર્વતીપ્રીતિપુત્રં
ધ્યાનપ્રેમં કૃપાલું વરદમઘહરં પુણ્યરૂપં પવિત્રમ્ ।
નિત્યાનન્દં વરેણ્યં રજતગિરિવરોત્તુઙ્ગશૃઙ્ગાધિવાસં
નિત્યં દેવર્ષિવન્દ્યં ભવહરમમલં વેદવેદ્યં પુરાણમ્ ॥ ૯॥

ઇતિ શ્રીકાર્તિકેયસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by Sivakumar Thyagarajan shivakumar24 at gmail.com,
PSA Easwaran psaeaswaran at gmail.com

.. shrIkArtikeyastotram 2 ..
Searchable pdf was typeset using XeTeXgenerateactualtext feature of XƎLaTeX 0.99996
on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*